# योगीश्वर-स्तोत्रम्

विलोक्य लोकान् कलिदुष्टचित्तान्

समाविशद् यः कृपयात्मनिष्ठः ।

गीतैव पाठ्या खलु मुक्तिहेतुर् -

योगीश्वरं तं प्रणमामि नित्यम् ॥

ये योगधर्मे कृतसंशयाश्च

ये चापि विश्वास-विहीन-चित्ताः ।

निःसंशयास्तान् कृतवान हो यो

विश्वास-युक्तानपि मोहमुक्तान् ॥

यो योगधर्म मृतवद्धि भूयोऽ -

करोत् सजीवं परिदर्श्य तस्य ।

असीमशक्तिं निजजीवनेऽस्मिन्

योगीश्वरं तं प्रणमामि नित्यम् ॥

गृहीह योऽसौ यतिवत् सदैव

सर्वास्ववस्था-स्वटलः समाधौ ।

सुखंच दुःखं तृणवद्धि यस्य

योगीश्वरं तं प्रणमामि नित्यम् ॥

यो लब्धसिद्धिः स्वयमेव भूत्वा

कृत्वात्र मार्ग सुगमंच सिद्धेः ।

दत्ताभयोस्मिन खलु दुर्बलेभ्यो

योगीश्वरं तं प्रणमामि नित्यम् ॥

नमो योगीन्द्रनाथाय योगतत्व-प्रचारिणे

अमृतत्व प्रबोधाय जगतां गुरुवे नमः ॥